# शिक्षा–निदेशालयः राष्ट्रिय–राजधानी–क्षेत्रम्, देहली–सर्वकारः

## वार्षिकम्–अभ्यासप्रश्नपत्रम्– 2025-26

## कक्षा- अष्टमी संस्कृतम्

**समयः 2.5 hr.** **पूर्णाङ्कः 60**

**सामान्य-निर्देशाः**

सर्वे प्रश्नाः अनिवार्याः।

उत्तराणि संस्कृतेनैव लेखनीयानि।

प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

प्रश्नसंख्या अवश्यमेव लेखनीया।

प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| • खण्ड 'क' | अपठित-अवबोधनम् | 8 अंकाः |
| • खण्ड 'ख' | रचनात्मक–कार्यम् | 12 अंकाः |
| • खण्ड 'ग' | अनुप्रयुक्त-व्याकरणम् | 18 अंकाः |
| • खण्ड 'घ' | पठित-अवबोधनम् | 22 अंकाः |

**खण्ड-क**

**अपठितांश अवबोधनम्** 8 अंकाः

1. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

मानवं परितः पृथ्वी, जलम्, आकाशं, वायुः च सर्वे पर्यावरणस्य घटकाः सन्ति। पर्यावरणस्य प्रदूषणेन जनाः रुग्णाः भवन्ति। दूषितं जलं पीत्वा उदररोगेण पीडिताः भवन्ति । वायुप्रदूषणेण श्वासरोगेण ज्वरेण च दुःखिताः भवन्ति । रासायनिक उर्वरकाणां प्रयोगेण भूमिः दूषिता भवति। इदं सम्यक् ज्ञातव्यं यत् पर्यावरणस्य रक्षणे एव अस्माकं रक्षणं भविष्यति। प्रदूषणस्य समस्यायाः समाधानाय स्थाने स्थाने वृक्षाः रोपणीयाः, नदीषु अवकरादि न क्षेपणीयाः, एवं वनानां पर्वतानां च संरक्षणम् करणीयम्। एतैः प्रयत्नैः पवनं शुद्ध, जलं निर्मलं भूमिः च उर्वरा भविष्यति।

**अ) एकपदेन उत्तरत - (केवलं प्रश्नत्रयम्)** **3×1=3**

i.) केषां प्रयोगेण भूमिः दूषिता भवति ?

ii.) प्रदूषणेन के रुग्णाः भवन्ति?

iii.) कुत्र अवकरादि न क्षेपणीयाः?

iv.) वनानां पर्वतानां च किं करणीयम् ?

ब) **पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्)** **1 x2=2**

i) कस्य रक्षणे एव अस्माकं रक्षण भविष्यति ?

ii) पर्यावरणस्य घटकाः के सन्ति?

स) **यथानिर्देशम् उत्तरत- (केवल प्रश्नद्वयम्)** **2×1=2**

i.) 'स्वच्छम्' इति पदस्य कि पर्यायपद गद्याशे प्रयुक्तम् ?

(क) प्रदूषितम् (ख) पवनम् (ग) निर्मलम्

ii.) 'जलम्' इति विशेष्यपदस्य विशेषणपदं किम् अत्र प्रयुक्तम्?

(क) पीत्वा ळ(ख) दूषितम् (ग) पीडिताः

iii.) 'स्वस्थाः' इति पदस्य कि विपरीतार्थकं पदं गद्यांशे प्रयुक्तम्?

(क) रुग्णाः (ख) दूषिता (ग) जनाः

**(द) अस्य अनुच्छेदस्य कृते उपयुक्त शीर्षक संस्कृतेन लिखत।** **1**

**खण्ड-ख**

**रचनात्मक कार्यम्** **12 अंकाः**

**2. चित्रं दृष्ट्वा मञ्जूषातः पदानि चित्वा चत्वारि वाक्यानि लिखत** **4x2=8**



**मञ्जूषा**

| |
|---|
| परीक्षा, विद्यार्थिनः, लिखन्ति, वार्षिकं, ध्यानेन, अग्रिमकक्षायां, विद्यालयः, शिक्षकाः, निरीक्षकाः, बोर्डपरीक्षा, लेखिन्या, उत्तरपुस्तिकां, छात्रा, छात्रः |

अथवा

'चित्रप्रदर्शनी' इति विषयम् अधिकृत्य चत्वारि वाक्यानि लिखत।

**प्र.3 पदानां मेलनं कृत्वा वाक्यरचनां कुरुत- 4 x1=4**

| | | | |
|---|---|---|---|
| (i) | पूर्वदिशायां | पादं | उदेति |
| (ii) | महाराष्ट्रस्य | जलं | कन्यापाठशाला |
| (iii) | नदीनां | सूर्यः | पीयूषतुल्यम् |
| (iv) | दृष्टिपूतं | प्रथमा | न्यसेत् |

**खण्ड-ग**

**अनुप्रयुक्त-व्याकरणम् 18 अंकाः**

**प्र.4 अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत (केवलं प्रश्नत्रयम्) 3x1=3**

i) विधेहि राष्ट्रे **तथा+अनुरक्तिम्**।
ii) मुखेन किमपि **नोक्तवती**।
iii) **क्षुधार्ताय** किमपि अकार्यं न भवति।
iv) अस्माकं **प्रथमोपग्रहस्य** नाम आर्यभट इति कृतम्।

**प्र. 5 अधोलिखितं प्रकृतिप्रत्ययं संयुज्य वियुज्य वा पदानि सृजत (केवलं प्रश्नत्रयम्) 3x1=3**

i) अनु+रक्तिम् = ………………….
ii) प्रति + क्रिया= …………………….
iii) वि + ज्ञानधना …………………….
iv) प्रक्षालयन्ति …………+…………

**प्र.6 मञ्जूषातः चित्वा समुचिताव्ययेन रिक्तस्थानानि पूरयत (केवलं प्रश्नत्रयम्) 3x1=3**

(i) एतत् ……………… सर्वथा अशोभनं कृत्यम्।

(ii) पर्यावरणेन………………. पशवः अपि रक्षणीयाः।

(iii) यदा पृथिव्याः छायापातेन चन्द्रस्य प्रकाशः अवरुध्यते………………. चन्द्रग्रहणं भवति।

(iv) गृहे यथा सर्वाधिका रम्या भगिनी भवति………………. भारतगृहे अपि सर्वाधिकाः रम्याः इमाः सप्तभगिन्यः सन्ति।।

**मञ्जूषा**

| |
|---|
| तथा, तदा, तु, सह |

**प्र. 7 उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत– (केवलं प्रश्नत्रयम्) 3x1=3**

(i) मम………… (गृह) …………… पुरतः मन्दिरम् अस्ति। (गृहं/गृहस्य)

(ii) रमेशः …………(कन्दुक)……….. क्रीडति। (कन्दुकेन/ कन्दुकस्य)

(iii) राकेशः ……(मुख)…………… कथां कथयति। (मुखेन/ मुखात्)

(iv) …………(शिक्षक)……… नमः। (शिक्षकेभ्यः, शिक्षकान्)

**प्र.8 उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत– (केवलं प्रश्नत्रयम्) 3x1=3**

i.) मानवाः अस्माकं ……………. विरमन्ति। **छायायां**/ **छायया**

**ii.)** एतस्यां……………. रात्रौ कोऽपि जीवः आगच्छति। **गुहायाः / गुहायां**

**iii.)** अधुना आपणे वस्तुक्रयार्थं ……………. अनिवार्यता नास्ति। **रुप्यकाणाम्/ रुप्यकं**

**iv.)** चञ्चलः ……………. अपृच्छत्। **नदीजलं/ नदीजलेन**

**प्र.9 उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत (केवलं प्रश्नत्रयम् ) 3x1=3**

**i.)** त्वं मां खादितुम् …………….। **इच्छति/ इच्छसि**

**ii.)** सूर्यःपश्चिमदिशायां च अस्तं……………. **गच्छति/गच्छन्ति।**

**iii.)** सः वस्त्रपूतं जलं ……………. **पिबेत्/ पिबेयुः।**

**iv.)** वयं सर्वाणि कार्याणि साधयितुं समर्थाः …………….। **भविष्यति/भविष्यामः**

## खण्ड-घ

**पठित-अवबोधनम् 22 अंकाः**

**प्र.10 अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत- 5**

पूर्वदिशायाम् उदेति सूर्यः पश्चिमदिशायां च अस्तं गच्छति इति दृश्यते हि लोके। परं न अनेन अवबोध्यमस्ति यत्सूर्यो गतिशील इति। सूर्योऽचलः पृथिवी च चला या स्वकीये अक्षे घूर्णति इति साम्प्रतं सुस्थापितः सिद्धान्तः। सिद्धान्तोऽयं प्राथम्येन येन प्रवर्तितः, स आसीत् महान् गणितज्ञः ज्योतिर्विच्च आर्यभटः। पृथिवी स्थिरा वर्तते इति परम्परया प्रचलिता रूढिः तेन प्रत्यादिष्टा। तेन उदाहृतं यद् गतिशीलायां नौकायाम् उपविष्टः

मानवः नौका स्थिरामनुभवति, अन्यान् च पदार्थान् गतिशीलान् अवगच्छति। एवमेव गतिशीलायां पृथिव्याम् अवस्थितः मानवः पृथिवीं स्थिरामनुभवति सूर्यादिग्रहान् च गतिशीलान् वेत्ति

**अ) एकपदेन उत्तरत– (केवलं प्रश्नमेकम्)** **1x1 = 1**

i.) सूर्यस्य गतिशीलत्वं कः प्रतिपादितवान्?
ii.) कस्याः गतिशीलत्वेन सूर्यः चलति इति दृश्यते?

**ब) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्)** **1x2 = 2**

i. नौकायां उपविष्टः मानवः किमनुभवति?
ii. आर्यभटेन कः सिद्धान्तः प्रतिपादितः?

**स) यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्)** **2x1 = 2**

**i)** '**महान् गणितज्ञः**' अनयोः पदयोः किं विशेष्यपदम् अस्ति?

क) महान् ख) गणितज्ञः ग) अनयोः पदयोः घ) न किमपि

**ii)** 'पूर्वम्' **पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?**

क) पश्चिमः ख) उदीची ग) दक्षिणा घ) प्राक्

**iii)** "मानवः नौका स्थिरामनुभवति" **अत्र किं क्रियापदम्?**

क) मानवः ख) अनुभवति ग) स्थिराम् घ) नौका

**प्र.11 अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत-** **5**

लुब्धस्य नश्यति यशः पिशुनस्य मैत्री नष्टक्रियस्य कुलमर्थपरस्य धर्मः।
विद्याफलं व्यसनिनः कृपणस्य सौख्यं राज्य प्रमत्तसचिवस्य नराधिपस्य ॥

**अ) एकपदेन उत्तरत– (केवलं प्रश्नमेकम्)** **1x1=1**

i.) व्यसनिनः किं नश्यति?
ii.) कस्य मैत्री नश्यति?

**ब) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्)** **1x2= 2**

i. कीदृशस्य नराधिपस्य राज्यं नश्यति ?
ii. कस्य धर्मः नश्यति?

**स) यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्)** **2x1= 2**

i.) 'वंशः' इत्यस्य किं पर्यायपदं अस्मिन् पद्यांशे प्रयुक्तम्?

(क) यशः  (ख) नष्टः  (ग) कुलम्

(ii) 'शत्रुता' इति पदस्य किं विलोमपदं पद्यांशे प्रयुक्तम्?

(क) प्रमत्तः  (ख) मैत्री   ग) सौख्यम्

(iii) 'प्रमत्तसचिवस्य नराधिपस्य' इत्यनयोः विशेषणपदं किम्?

(क) प्रमत्तसचिवस्य  (ख) नरः  (ग) अधिपस्य

**प्र.12 अधोलिखितं संवादं पठित्वा प्रदत्तप्रश्नानाम उत्तराणि लिखत–                    5**

अध्यापिका– इमाः सप्तभगिन्यः स्वीये प्राचीनेतिहासे प्रायः स्वाधीनाः एव दृष्टाः। न केनापि शासकेन इमाः स्वायत्तीकृताः।

तन्वी– अयं शब्दः सर्वप्रथमं कदा प्रयुक्तः?

अध्यापिका– श्रुतमधुरशब्दोऽयं सर्वप्रथमं विगतशताब्दस्य द्विसप्ततितमे वर्षे त्रिपुराराज्यस्योद्घाटनक्रमे केनापि प्रवर्तितः।

स्वरा – अन्यत् किमपि वैशिष्ट्यमस्ति एतेषाम् ?

अध्यापिका– नूनम् अस्ति एव। पर्वत–वृक्ष–पुष्प–प्रभृतिभिः प्राकृतिकसम्पद्भिः सुसमृद्धानि सन्ति इमानि राज्यानि।

**अ) एकपदेन उत्तरत–   (केवलं प्रश्नमेकम्)                    1x1 = 1**

i. काः स्वीये प्राचीनेतिहासे स्वीधीनाः एव दृष्टाः?
ii. अन्यत् किमपि वैशिष्ट्यमस्ति एतेषाम्" इति का वदति ?

**ब) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्)                    1x2 = 2**

i. श्रुतमधुरशब्दः सर्वप्रथमं कदा प्रवर्तितः?
ii. भगिनी सप्तकराज्यानि काभिः सुसमृद्धानि सन्ति?

**स) यथानिर्देशम् उत्तरत-    (केवलं प्रश्नद्वयम्)                    2x1 = 2**

i. 'स्वतन्त्राः' इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

   (क) स्वीयः  (ख) दृष्टाः  (ग) स्वाधीनाः

ii. 'मधुरः शब्दः' इत्यनयोः विशेष्यपदं किम् अस्ति ?

   (क) शब्दः  (ख) श्रुतः (ग) मधुरः

iii. 'नूनम् अस्ति एव' अत्र क्रियापदं किम् अस्ति?

   (क) नूनम्   ख) अस्ति ग) एव

**13. मञ्जूषातः समुचितानि पदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत–      3x1= 3**

**मम गीतैर्मुग्धं समं जगत्, मम नृत्यैर्मुग्धं समं जगत्।**

**मम काव्यैर्मुग्धं सम जगत्, रसभरिता भारतजनताऽहम् ।।**

**अन्वयः-** मम (i) …………………. समम् जगत् मुग्धम्, (ii) …………………. नृत्यैः समम् जगत् मुग्धम्, मम (iii) …………………. भारतजनता रसभरिता (अस्मि)।

**मञ्जूषा**

| |
|---|
| मम, गीतैः, काव्यैः |

**प्र. 14 प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् कमपि श्लोकद्वयं संस्कृतेन लिखत। 2x2=4**

श्लोक-1 ……………………………………………………………

……………………………………………………………

श्लोक-2 ……………………………………………………………

……………………………………………………………